श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री वरदवेदान्ताचार्यस्य (काडन्देत्ति आण्डवन्) कृतिषु

# ॥ श्री कोमला दण्डकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कोमला दण्डकम् ॥

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूत समस्त देववनितां लोकैक दीपाङ्कुराम्।
श्रीमन्मन्दकटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम्॥

मातर्नमामि कमले ! कमलायताक्षि !
श्रीविष्णुहृत्कमलवासिनि ! विश्वमातः !।
क्षीरोदजे ! कमलकोमलगर्भगौरि !
लक्ष्मि ! प्रसीद सततं नमतां शरण्ये !॥

जय दुग्धाब्धि तनये जय शार्ङ्गधर प्रिये।
जय कारुण्य सुरभे जय लावण्य वारिधे॥

जय जय जय दीव्यदिन्दीवरच्छायकूलङ्कषस्यन्दि -
कालिन्दिकामन्दमन्दानिलोदञ्चिवीचीसमीचीनवेणी -
भवत्केशपाशातिथीभूतपाथोधरे !
पीतवासोधरे !
बिम्बशोणाधरे !
जृम्भमाणामृताभीशुबिम्बायुतेनाशुसम्प्राप्त -
सौन्दर्यवक्त्रारविन्दे !
दरस्पन्दपक्ष्मद्वयीपक्षसंलक्ष्यचक्षुर्मिलिन्दे !
सुधासध्र्युगुक्तिच्छलोद्यन्मरन्दे !
गिरं देहि देवीडितुं त्वाऽभिवन्दे !

रदस्पर्धिकुन्देऽनुरज्यन्मुकुन्दे !
शरत्पर्वचन्द्रक्षरच्चन्द्रिकाऽखर्वगर्वैकसर्वङ्कष -
स्फाररोचिस्फुरन्मन्दहासे !
लसच्चन्द्रहासे !
तनीयोनतभ्रूयुगीयोपमानीयदामोदमानेषु -
चञ्चच्छरासे !
दयासारसारोल्लसत्दृग्विलासे !
ततो भक्तिभाजां कृतांहोनिरासे !
मणीमण्डलप्रोल्लसत्कुण्डले !
तज्जितोदग्रभाभानुमन्मण्डले !
कम्बुदुष्प्रापकण्ठाभयालङ्कृते !
कंसजित्सत्कृते कञ्जगर्भस्थिते !
कुम्भिकुम्भप्रतिद्वन्द्विवक्षोरुहे !
बाहुदम्भोल्लसत्कल्पकानोकहे !
शातकुम्भद्युते !
साधुकुम्भस्तुते !
हे सरस्वत्सुते !
योगिहृद्दुर्ग्रहाकारमध्ये !
महाभोगिमध्येशयाधीशवक्षस्थलावासशीले -
ऽखिलाशास्यलीले !
कला पुष्कले !
मञ्जुशिञ्जानमञ्जीरचञ्चत्पदे !
किञ्च कञ्जत्पदे !
सर्व संपत्प्रदे ॥ 1 ॥

कमितुरुरसि कौस्तुभाभापरीवाहबालातपोदार -
पादारविन्दप्रभे !

पाहि पद्मे शुभे !
पद्मसंलाञ्छिते प्रत्त सद्वाञ्छिते !
भक्तलोकाञ्चिते !
वेदवेदान्तवेद्येऽन्यदुर्निग्रहोदीर्णदौर्गत्य -
वैद्येऽनवद्ये !
वधूमात्रदुष्प्रापसद्रूपधेये !
जगत्पावयन्नामधेये !
हरेर्रूपधेयानुरूपे !
दृशा निर्जितत्रस्तसद्रूपधेये !
वपुश्शोभयाऽधोभवज्जातरूपेऽतिलावण्यरामा -
समाजाभिरामे !
रमे !
मञ्जुकञ्जत्स्फुरत्पाणिपाथोरुहे !
बभ्रमद्भम्भरप्रेयसीपालिकामोहविश्राणन -
प्रक्रियैकाग्रपुङ्खानुपुङ्खानुधावत्कटाक्षप्रवाहे !
मृणालप्रतिस्पर्धिबाहे !
ललाटेलसच्चित्रकीचक्रितन्यङ्कुनाभे !
सुधायास्सनाभेऽनुभावातुलाविप्रभास्वत्तुलाकोटि -
युक्तेऽमृतस्यन्दिसूक्ते !
अभिवन्दारुमन्दारसन्तानशाखे !
विशाखेशलोकेशमेघेशयानादिनानादिवौकोभि -
राराधिते भारती वन्दिते !
पार्वती नन्दिते !
वासवी सेविते
का समा देवि ते ॥ 2 ॥

अयि जननि दयासुधासारसंप्लावितापाङ्ग -
संभावितोयस्त्वयावास भूमिः
श्रियाऽनन्यसाधारणीभूतयाऽऽश्लिष्यते
तावदध्युष्यते तद्गृहद्वारमुद्यन्मदै -
रद्रिवद्बन्धुरैः सिन्धुरैरप्युदञ्चन्मरुद्बान्धवैः
सैन्धवैरंशुमन्मण्डलीनन्दनैः स्यन्दनैः पत्तिभिः
प्राप्तसंपत्तिभिर्विस्मृतापत्तिभिः
संहतिर्वैरिणां तेन सञ्जीयते !
जायते तद्विषां प्राणनं काननं तस्य चेदाननं
भारती मञ्जु भद्रासनं शासनम् !
तस्य चेत् सर्वसर्वंसहाधीश चूडायते !
तद्वशी बोभवीत्युर्वशी भूयते तत्परीरम्भसंरम्भया
रंभया वाहनं तस्य चैरावतो वाथवा वारिदो
गीयते तद्यशस्सर्व हाहादि गन्धर्ववर्गैरलं
पुष्कलं तद्यशस्स्रोतसा सर्वदिग्पूर्यते तस्य
सिध्यन्ति नानापुमर्थाः विना तेन के वा समर्था
जनाः किं परं वर्ण्यते यत्तवापाङ्गतो
विश्वमेतच्चरस्थावराकारमध्येधते
पाहि पद्मालये !
पाहि पद्मानने !
पाहि कारुण्यसिन्धो !
नमस्ते समस्तेप्सितार्थप्रदानैकतानैकहस्ते !
मुहुस्ते पुनस्ते नमस्ते समस्ते नमस्ते नमः ! ॥ 3 ॥

सामादिश्रुतिघोषितात्मविभवा हेमारविन्दासना
धामाधःकृतदिव्यकाञ्चनरुचिः सोमाभिरामानना !।

रामा शार्ङ्गधरस्य कोमललता नामास्तु भूमौ सताम्
सीमा सद्गुणसम्पदामविरतक्षेमाय भामा मणिः॥

पत्युः प्रभावलयि कौस्तुभ वैजयन्ती -
श्रीवत्सभूषणमुरः परिभूषयन्ती।
दुग्धांबुराशि कुलमङ्गळ वैजयन्ती
श्री कोमळास्तु सततं सुगुणैर्जयन्ती॥

॥ इति श्री कोमला दण्डकं समाप्तम्॥

sunder kidāmbi prapatti dot com sunder kidāmbi